ओं नमः परमात्मने, श्री महागणपतये नमः,

श्री गुरुभ्यो नमः, ह॒रि॒ः ओं

# कृष्ण यजुर्वेदीय तैत्तिरीय संहिता

# पद पाठः (वाक्य सहित)

# तृतीयकाण्डे चतुर्थः प्रश्नः

**Notes:**

- **Please refer to the book “TS Kandam 1” and “TS 1.1 pada paadam with Vaakyam” for notes and conventions used in this Compilation.**
- **Please download our vedic compilations from our web site www.vedavms.in**

**Version 1.0 November 30, 2020**

## Version Notes:

**This is now the current Version 1.0 dated November 30, 2020.**

1. This replaces the earlier version 0.0 dated July 31, 2019.

2. This version has been updated with the errors found and reported till November 15, 2020.

3. Required convention, style and presentation improvements or standardisations has been done whereever applicable.

## Earlier Versions

| | | |
|---|---|---|
| 1st | Version Number | 0.0 dated 31st January 2019 |
| 2nd | Version Number | 0.0 dated 31st July 2019 |

# Table of Contents

3 कृष्ण यजुर्वेदीय तैत्तिरीय संहितायं पद पाठे तृतीयं काण्डं ... 4

3.4 तृतीयकाण्डे चतुर्थः प्रश्नः – इष्टिहोमाभिधानं .......... 4

ओं नमः परमात्मने, श्री महागणपतये नमः, श्री गुरुभ्यो नमः

हरिः ओं

# 3 कृष्ण यजुर्वेदीय तैत्तिरीय संहितायं पद पाठे

# तृतीयं काण्डं

## 3.4 तृतीयकाण्डे चतुर्थः प्रश्नः – इष्टिहोमाभिधानं

**TS 3.4.1.1**

वि वा एतस्य यज्ञ ऋद्ध्यते यस्य हविरतिरिच्यते सूर्यो देवो दिविषद्भ्य इत्याह बृहस्पतिना चैवास्य प्रजापतिना च यज्ञस्य व्यृद्धमपि वपति रक्षाꣳसि वा एतत् पशुꣳ सचन्ते यदेकदेवत्य आलब्धो भूयान् भवति यस्यास्ते हरितो गर्भ इत्याह देवत्रैवैनां गमयति रक्षसामपहत्या आ वर्तन वर्तयेत्याह – [ ] **1**

**TS 3.4.1.1 - Padam**

वीति । वै । एतस्य । यज्ञः । ऋद्ध्यते । यस्य । हविः ।

अतिरिच्यत इत्यति – रिच्यते । सूर्यः । देवः ।

दिविषद्भ्य इति दिविषत् – भ्यः । इति । आह । बृहस्पतिना ।

च । एव । अस्य । प्रजापतिनेति प्रजा – पतिना । च । यज्ञस्य ।

व्यृद्धमिति वि – ऋद्धम् । अपीति । वपति । रक्षाꣳसि । वै । एतत् ।

पशुम् । सचन्ते । यत् । एकदेवत्य इत्येक – देवत्यः । आलब्ध

इत्या – लब्धः । भूयान् । भवति । यस्याः । ते । हरितः । गर्भः ।

इति । आह । देवत्रेति देव – त्रा । एव । एनाम् । गमयति ।

रक्षसाम् । अपहत्या इत्यप – हत्यै । एति । वर्तन । वर्तय । इति ।

आह । **1 (50)**

**<u>TS 3.4.1.2</u>**

ब्रह्मणैवैनमा वर्तयति वि ते भिनद्मि तकरीमित्याह

यथायजुरेवैतदुरुद्रप्सो विश्वरूप इन्दुरित्याह प्रजा वै पशव इन्दुः

प्रजयैवैनं पशुभिः समर्द्धयति दिवं ँवै यज्ञस्य व्यृद्धं गच्छति

पृथिवीमतिरिक्तं तद्यन्न शमयेदार्तिमार्च्छेद्–यजमानो मही द्यौः

पृथिवीच न इत्या – [ ] **2**

## TS 3.4.1.2 - Padam

ब्रह्मणा । एव । एनम् । एति । वर्तयति । वीति । ते । भिनद्मि ।
तकरीम् । इति । आह । यथायजुरिति यथा – यजुः । एव । एतत् ।
उरुद्रप्स इत्युरु – द्रप्सः । विश्वरूप इति विश्व – रूपः । इन्दुः ।
इति । आह । प्रजेति प्र – जा । वै । पशवः । इन्दुः । प्रजयेति
प्र – जया । एव । एनम् । पशुभिरिति पशु – भिः । समिति ।
अर्द्धयति । दिवम् । वै । यज्ञस्य । व्यृद्धमिति वि–ऋद्धम् ।
गच्छति । पृथिवीम् । अतिरिक्तमित्यति – रिक्तम् । तत् । यत् । न ।
शमयेत् । आर्तिम् । एति । ऋच्छेत् । यजमानः । मही । द्यौः ।
पृथिवी । च । नः । इति । **2 (50)**

**TS 3.4.1.3**

ह द्यावापृथिवीभ्यामेव यज्ञस्य व्यृद्धं चातिरिक्तं च शमयति
नाऽऽ*र्तिमार्च्छति यजमानो भस्मना ऽभि समूहति स्वगाकृत्या अथो
अनयोर्वा एष गर्भोऽनयोरेवैनं दधाति यदवद्येदति तद् रेचयेद्
यन्नावद्येत् पशोरालब्धस्य नाऽव द्येत् पुरस्तान्नाभ्या
अन्यदवद्येदुपरिष्टादन्यत् पुरस्ताद्धै नाभ्यै – [ ] 3

## TS 3.4.1.3 - Padam

आह । द्यावापृथिवीभ्यामिति द्यावा – पृथिवीभ्याम् । एव । यज्ञस्य ।

व्यृद्धमिति वि – ऋद्धम् । च । अतिरिक्तमित्यति – रिक्तम् । च ।

शमयति । न । आर्तिम् । एति । ऋच्छति । यजमानः । भस्मना ।

अभि । समिति । ऊहति । स्वगाकृत्या इति स्वगा – कृत्यै ।

अथो इति । अनयोः । वै । एषः । गर्भः । अनयोः । एव । एनम् ।

दधाति । यत् । अवद्येदित्यव–द्येत् । अतीति । तत् । रेचयेत् । यत् ।

न । अवद्येदित्यव – द्येत् । पशोः । आलब्धस्येत्या–लब्धस्य । न ।

अवेति । द्येत् । पुरस्तात् । नाभ्याः । अन्यत् । अवद्येदित्यव – द्येत् ।

उपरिष्टात् । अन्यत् । पुरस्तात् । वै । नाभ्यै । **3 (50)**

**TS 3.4.1.4**

प्राण उपरिष्टादपानो यावानेव पशुस्तस्याव द्यति विष्णवे शिपिविष्टाय

जुहोति यद्वै यज्ञस्यातिरिच्यते यः पशोर्भूमा या पुष्टिस्तद्–विष्णुः

शिपिविष्टो ऽतिरिक्त एवातिरिक्तं दधात्यतिरिक्तस्य शान्त्या

अष्टाप्रूड्ढिरण्यं दक्षिणाऽष्टापदी ह्येषा ऽऽत्मा नवमः पशोराप्त्या

अन्तरकोश उष्णीषेणाऽऽ*विष्टितं भवत्येवमिव हि पशुरुल्बमिव ( )
चर्मेव मा(ग्)समिवास्थीव यावानेव पशु–स्त–माप्त्वाऽव रुन्धेयस्यैषा
यज्ञे प्रायश्चित्तिः क्रियत इष्ट्वा वसीयान् भवति ॥ **4**

**<u>TS 3.4.1.4 - Padam</u>**

प्राण इति प्र – अनः । उपरिष्टात् । अपान इत्यप–अनः । यावान् ।
एव । पशुः । तस्य । अवेति । द्यति । विष्णवे । शिपिविष्टायेति
शिपि – विष्टाय । जुहोति । यत् । वै । यज्ञस्य । अतिरिच्यत
इत्यति – रिच्यते । यः । पशोः । भूमा । या । पुष्टिः । तत् । विष्णुः ।
शिपिविष्ट इति शिपि – विष्टः । अतिरिक्त इत्यति – रिक्ते । एव ।
अतिरिक्तमित्यति – रिक्तम् । दधाति । अतिरिक्तस्येत्यति – रिक्तस्य ।
शान्त्यै । अष्टापूडित्यष्टा – पूट् । हिरण्यम् । दक्षिणा ।
अष्टापदीत्यष्टा – पदी । हि । एषा । आत्मा । नवमः । पशोः ।
आप्त्यै । अन्तरकोश इत्यन्तर – कोशे । उष्णीषेण ।
आविष्टितमित्या – विष्टितम् । भवति । एवम् । इव । हि । पशुः ।
उल्बम् । इव ( ) । चर्म । इव । मा(ग्)सम् । इव । अस्थि । इव ।

यावान् । एव । पशुः । तम् । आप्त्वा । अवेति । रुन्धे । यस्य ।

एषा । यज्ञे । प्रायश्चित्तिः । क्रियते । इष्ट्वा । वसीयान् ।

भवति ॥ **4 (71)**

*(वर्तयत्याह–न इति–वै नाभ्या–उल्बमिवै–कविꣳशतिश्च) (A1)*

**TS 3.4.2.1**

आ वायो भूष शुचिपा उप नः सहस्रं ते नियुतो विश्ववार ।

उपो ते अन्धो मद्य–मयामि यस्य देव दधिषे पूर्वपेयं ॥

आकूत्यै त्वा कामाय त्वा समृधे त्वा किक्किटा ते मनः प्रजापतये

स्वाहा किक्किटा ते प्राणं ँवायवे स्वाहा किक्किटा ते चक्षुः सूर्याय

स्वाहा किक्किटा ते श्रोत्रं द्यावापृथिवीभ्याꣳ स्वाहा किक्किटा ते

वाचꣳ सरस्वत्यै स्वाहा– [ ] **5**

**TS 3.4.2.1 - Padam**

एति । वायो इति । भूष । शुचिपा इति शुचि – पाः । उपेति । नः ।

सहस्रम् । ते । नियुत इति नि – युतः । विश्ववारेति विश्व – वार ॥

उपो इति । ते । अन्धः । मद्यम् । अयामि । यस्य । देव । दधिषे ।

पूर्वपेयमिति पूर्व – पेयम् ॥ आकूत्या इत्या–कूत्यै । त्वा । कामाय । त्वा । समृध इति सं – ऋधे । त्वा । किक्किटा । ते । मनः । प्रजापतय इति प्रजा – पतये । स्वाहा । किक्किटा । ते । प्राणमिति प्र – अनम् । वायवे । स्वाहा । किक्किटा । ते । चक्षुः । सूर्याय । स्वाहा । किक्किटा । ते । श्रोत्रम् । द्यावापृथिवीभ्यामिति द्यावा–पृथिवीभ्याम् । स्वाहा । किक्किटा । ते । वाचम् । सरस्वत्यै । स्वाहा । **5 (50)**

**TS 3.4.2.2**

त्वं तुरीया वशिनी वशाऽसि सकृद् यत् त्वा मनसा गर्भ आ ऽशयत् ।
वशा त्वं वँशिनी गच्छ देवान्थ्–सत्याः सन्तु यजमानस्य कामाः ॥
अजा ऽसि रयिष्ठा पृथिव्या७ं सीदोर्द्ध्वाऽन्तरिक्षमुप तिष्ठस्व दिवि ते बृहद् भाः ॥
तन्तुं तन्वन् रजसो भानुमन्विहि ज्योतिष्मतः पथो रक्ष धिया कृतान् ॥
अनुल्बणं वँयत जोगुवा–मपो मनु ( ) र्भव जनया दैव्यं जनं ॥
मनसो हविरसि प्रजापतेर्वर्णो गात्राणां ते गात्रभाजो भूयास्म ॥ **6**

**TS 3.4.2.2 - Padam**

त्वम् । तुरीया । वशिनी । वशा । असि । सकृत् । यत् । त्वा । मनसा । गर्भः । एति । अशयत् ॥ वशा । त्वम् । वशिनी । गच्छ । देवान् । सत्याः । सन्तु । यजमानस्य । कामाः ॥ अजा । असि । रयिष्ठेति रयि – स्था । पृथिव्याम् । सीद । ऊर्ध्वा । अन्तरिक्षम् । उपेति । तिष्ठस्व । दिवि । ते । बृहत् । भाः ॥ तन्तुम् । तन्वन्न् । रजसः । भानुम् । अन्विति । इहि । ज्योतिष्मतः । पथः । रक्ष । धिया । कृतान् ॥ अनुल्बणम् । वयत । जोगुवाम् । अपः । मनुः( ) । भव । जनय । दैव्यम् । जनम् ॥ मनसः । हविः । असि । प्रजापतेरिति प्रजा – पतेः । वर्णः । गात्राणाम् । ते । गात्रभाज इति गात्र – भाजः । भूयास्म ॥ **6 (63)**

***(सरस्वत्यै स्वाहा – मनु – स्त्रयोदश च) (A2)***

**TS 3.4.3.1**

इमे वै सहाऽऽ*स्तां ते वायुर्व्यवात् ते गर्भमदधातां त९ँ सोमः प्राजनय–दग्निरग्रसत स एतं प्रजापतिराग्नेय–मष्टाकपालमपश्यत् तं

निरवपत् तेनैवैनामग्नेरधि निरक्रीणात् तस्मादप्यन्यदेवत्यामालभमान आग्नेयमष्टाकपालं पुरस्तान्निर्वपेदग्ने–रेवैनामधि निष्क्रीयाऽऽलभते यद् – [ ] **7**

## TS 3.4.3.1 - Padam

इमे इति । वै । सह । आस्ताम् । ते इति । वायुः । वीति । अवात् । ते इति । गर्भम् । अदधाताम् । तम् । सोमः । प्रेति । अजनयत् । अग्निः । अग्रसत । सः । एतम् । प्रजापतिरिति प्रजा – पतिः । आग्नेयम् । अष्टाकपालमित्यष्टा – कपालम् । अपश्यत् । तम् । निरिति । अवपत् । तेन । एव । एनाम् । अग्नेः । अधि । निरिति । अक्रीणात् । तस्मात् । अपीति । अन्यदेवत्यामित्यन्य – देवत्याम् । आलभमान इत्या – लभमानः । आग्नेयम् । अष्टाकपालमित्यष्टा–कपालम् । पुरस्तात् । निरिति । वपेत् । अग्नेः । एव । एनाम् । अधीति । निष्क्रीयेति निः – क्रीय । एति । लभते । यत् । **7 (50)**

**TS 3.4.3.2**

वा॒युर्व्य॑वा॒त् तस्मा᳚द्–वा॒य॒व्या॑ य॒दि॒मे गर्भ॒मद॑धा॒ता॑ं तस्मा᳚द्–
द्यावापृथि॒व्या॑ यथ् सोम॒: प्राज॑नयद॒ग्निर॑ग्रसत॒ तस्मा॑दग्नीषो॒मीया॒
यद॒नयो᳚र्विय॒त्योर्वाग॑वद॒त् तस्मा᳚थ् सारस्व॒ती यत् प्र॒जाप॑तिर॒ग्नेरधि॑
निर॒क्रीणा॒त् तस्मा᳚त् प्राजाप॒त्या सा वा ए॒षा स॑र्वदेव॒त्या॑ यद॒जा व॒शा
वा॑य॒व्या॑मा ल॑भेत॒ भूति॑कामो वा॒यु॑र्वै क्षेपि॑ष्ठा दे॒वता॑ वा॒यु॒मे॒व
स्वेन॑– [ ] **8**

**TS 3.4.3.2 - Padam**

वा॒युः । व्य॒वा॒दि॑ति॒ वि – अ॒वा᳚त् । तस्मा᳚त् । वा॒य॒व्या᳚ । यत् ।
इ॒मे इति॑ । गर्भ᳚म् । अद॑धाताम् । तस्मा᳚त् । द्या॒वा॒पृ॒थि॒व्येति॑
द्यावा – पृ॒थि॒व्या᳚ । यत् । सोम॑: । प्रेति॑ । अज॑नयत् । अ॒ग्निः ।
अग्र॑सत । तस्मा᳚त् । अ॒ग्नी॒षो॒मीयेत्यग्नी॑–सो॒मीया᳚ । यत् । अ॒नयो᳚: ।
वि॒य॒त्योरिति॑ वि – य॒त्योः । वाक् । अव॑दत् । तस्मा᳚त् । सा॒रस्व॒ती ।
यत् । प्र॒जाप॑ति॒रिति॑ प्र॒जा – प॒ति॒: । अ॒ग्नेः । अधीति॑ ।
नि॒रक्री॑णा॒दिति॑ निः – अक्री॑णात् । तस्मा᳚त् ।

प्राजापत्येति प्राजा – पत्या । सा । वै । एषा । सर्वदेवत्येति

सर्व – देवत्या । यत् । अजा । वशा । वायव्याम् । एति । लभेत ।

भूतिकाम इति भूति – कामः । वायुः । वै । क्षेपिष्ठा । देवता ।

वायुम् । एव । स्वेन । **8 (50)**

**<u>TS 3.4.3.3</u>**

भागधेयेनोप धावति स एवैनं भूतिं गमयति द्यावापृथिव्यामा लभेत

कृषमाणः प्रतिष्ठाकामो दिव एवास्मै पर्जन्यो वर्.षति व्यस्यामोषधयो

रोहन्ति समर्द्धुकमस्य सस्यं भवत्यग्नीषोमीयामा लभेत यः

कामयेतान्नवानन्नादः स्यामित्यग्निनैवान्नमव रुन्धे

सोमेनान्नाद्य–मन्नवानेवान्नादो भवति सारस्वतीमा लभेत य – [ ] **9**

**<u>TS 3.4.3.3 - Padam</u>**

भागधेयेनेति भाग – धेयेन । उपेति । धावति । सः । एव । एनम् ।

भूतिम् । गमयति । द्यावापृथिव्यामिति द्यावा – पृथिव्याम् । एति ।

लभेत । कृषमाणः । प्रतिष्ठाकाम इति प्रतिष्ठा–कामः । दिवः । एव ।

अस्मै । पर्जन्यः । वर्.षति । वीति । अस्याम् । ओषधयः । रोहन्ति ।

समर्द्धुकमिति सं – अर्द्धुकम् । अस्य । सस्यम् । भवति ।

अग्नीषोमीयामित्यग्नी–सोमीयाम् । एति । लभेत । यः । कामयेत ।
अन्नवान्नित्यन्न – वान् । अन्नाद इत्यन्न – अदः । स्याम् ।
इति । अग्निना । एव । अन्नम् । अवेति । रुन्धे । सोमेन ।
अन्नाद्यमित्यन्न – अद्यम् । अन्नवान्नित्यन्न – वान् । एव ।
अन्नाद इत्यन्न – अदः । भवति । सारस्वतीम् । एति ।
लभेत । यः । **9 (50)**

**<u>TS 3.4.3.4</u>**

ईश्वरो वाचो वदितोः सन् वाचं नवदेद्–वाग्वै सरस्वती सरस्वतीमेव स्वेन भागधेयेनोप धावति सैवास्मिन् वाचं दधाति प्राजापत्यामा लभेत यः कामयेतानभिजितमभि जयेयमिति प्रजापतिः सर्वा देवता देवताभिरेवा–नभिजितमभि जयति वायव्ययोपाकरोति वायोरेवैनामवरुद्ध्या ऽऽलभत आकूत्यै त्वा कामाय त्वे – [ ] **10**

## <u>TS 3.4.3.4 - Padam</u>

ईश्वरः । वाचः । वदितोः । सन्न् । वाचम् । न । वदेत् । वाक् । वै ।
सरस्वती । सरस्वतीम् । एव । स्वेन । भागधेयेनेति भाग – धेयेन ।

उपेति । धावति । सा । एव । अस्मिन्न् । वाचम् । दधाति ।

प्राजापत्यामिति प्राजा – पत्याम् । एति । लभेत । यः । कामयेत ।

अनभिजितमित्यनभि – जितम् । अभीति । जयेयम् । इति ।

प्रजापतिरिति प्रजा – पतिः । सर्वाः । देवताः । देवताभिः । एव ।

अनभिजितमित्यनभि – जितम् । अभीति । जयति । वायव्यया ।

उपाकरोतीयुप – आकरोति । वायोः । एव । एनाम् ।

अवरुद्ध्येत्यव – रुद्ध्य । एति । लभते । आकूत्या इत्या – कूत्यै ।

त्वा । कामाय । त्वा । **10 (50)**

**<u>TS 3.4.3.5</u>**

त्याह यथायजुरेवैतत् किक्किटाकारं जुहोति किक्किटाकारेण वै ग्राम्याः

पशवो रमन्ते प्राऽऽ*रण्याः पतन्ति यत् किक्किटाकारं जुहोति

ग्राम्याणां पशूनां धृत्यै पर्यग्नौ क्रियमाणे जुहोति जीवन्तीमेवैनाँ्

सुवर्गं ँल्लोकं गमयति त्वं तुरीया वशिनी वशाऽसीत्याह देवत्रैवैनां

गमयति सत्याः सन्तु यजमानस्य कामा इत्याहैष वै कामो –[ ] **11**

## TS 3.4.3.5 - Padam

इति । आह । यथायजुरिति यथा – यजुः । एव । एतत् ।
किक्किटाकारमिति किक्किटा – कारम् । जुहोति । किक्किटाकारेणेति
किक्किटा – कारेण । वै । ग्राम्याः । पशवः । रमन्ते । प्रेति ।
आरण्याः । पतन्ति । यत् । किक्किटाकारमिति किक्किटा – कारम् ।
जुहोति । ग्राम्याणाम् । पशूनाम् । धृत्यै । पर्यग्नाविति परि–अग्नौ ।
क्रियमाणे । जुहोति । जीवन्तीम् । एव । एनाम् । सुवर्गमिति
सुवः – गम् । लोकम् । गमयति । त्वम् । तुरीया । वशिनी । वशा ।
असि । इति । आह । देवत्रेति देव – त्रा । एव । एनाम् । गमयति ।
सत्याः । सन्तु । यजमानस्य । कामाः । इति । आह । एषः । वै ।
कामः । **11 (50)**

## TS 3.4.3.6

यजमानस्य यदनार्त उदृचं गच्छति तस्मादेवमाहाऽजाऽसि
रयिष्ठेत्याहैष्वेवैनां ँल्लोकेषु प्रति ष्ठापयति दिवि ते बृहद् भा इत्याह
सुवर्ग एवास्मै लोके ज्योतिर् दधाति तन्तुं तन्वन् रजसो

भानुमन्विहीत्याहेमानेवास्मै लोकान् ज्योतिष्मतः करोत्यनुल्बणं

वयत जोगुवा–मप इत्या–[ ] **12**

**TS 3.4.3.6 - Padam**

यजमानस्य । यत् । अनार्तः । उदृचमित्युत् – ऋचम् । गच्छति ।

तस्मात् । एवम् । आह । अजा । असि । रयिष्ठेति रयि – स्था ।

इति । आह । एषु । एव । एनाम् । लोकेषु । प्रतीति । स्थापयति ।

दिवि । ते । बृहत् । भाः । इति । आह । सुवर्ग इति सुवः– गे ।

एव । अस्मै । लोके । ज्योतिः । दधाति । तन्तुम् । तन्वन्न् ।

रजसः । भानुम् । अन्विति । इहि । इति । आह । इमान् । एव ।

अस्मै । लोकान् । ज्योतिष्मतः । करोति । अनुल्बणम् । वयत ।

जोगुवाम् । अपः । इति । **12 (50)**

**TS 3.4.3.7**

–ह यदेव यज्ञ उल्बणं क्रियते तस्यैवैषा शान्तिर्मनुर्भव

जनया दैव्यं जनमित्याह मानव्यो वै प्रजास्ता एवाऽऽ*द्याः

कुरुते मनसो हविरसीत्याह स्वगाकृत्यै गात्राणां ते गात्रभाजो

भूयास्मेत्याहाऽऽ*शिषमेवैतामा शास्ते तस्यै वा एतस्या

एकमेवादेवयजनं ँयदालब्धायामभ्रो – [ ] 13

**TS 3.4.3.7 - Padam**

आह । यत् । एव । यज्ञे । उल्बणम् । क्रियते । तस्य । एव । एषा ।

शान्तिः । मनुः । भव । जनय । दैव्यम् । जनम् । इति । आह ।

मानव्यः । वै । प्रजा इति प्र – जाः । ताः । एव । आद्याः । कुरुते ।

मनसः । हविः । असि । इति । आह । स्वगाकृत्या इति

स्वगा – कृत्यै । गात्राणाम् । ते । गात्रभाज इति गात्र – भाजः ।

भूयास्म । इति । आह । आशिषमित्या – शिषम् । एव । एताम् ।

एति । शास्ते । तस्यै । वै । एतस्याः । एकम् । एव ।

अदेवयजनमित्यदेव – यजनम् । यत् ।

आलब्धायामित्या – लब्धायाम् । अभ्रः । 13 (50)

**TS 3.4.3.8**

भवति यदालब्धायामभ्रः स्यादप्सु वाप्रवेशयेथ् सर्वां ँवा

प्राश्ञीयाद् यदप्सु प्रवेशयेद् यज्ञवेशसं कुर्याथ् सर्वामेव

प्राश्ञीयादिन्द्रियमेवाऽऽ*त्मन् धत्ते सा वा एषा त्रयाणामेवाव

रुद्धा सँवथ्सरसदः सहस्रयाजिनो गृहमेधिनस्त एवैतया

यजेरन् तेषामेवैषा ऽऽप्ता ॥ **14**

**TS 3.4.3.8 - Padam**

भवति । यत् । आलब्धायामित्या – लब्धायाम् । अभ्रः । स्यात् ।

अफ्स्वित्यप्–सु । वा । प्रवेशयेदिति प्र – वेशयेत् । सर्वाम् । वा ।

प्रेति । अश्ञीयात् । यत् । अफ्स्वित्यप् – सु । प्रवेशयेदिति

प्र – वेशयेत् । यज्ञवेशसमिति यज्ञ – वेशसम् । कुर्यात् । सर्वाम् ।

एव । प्रेति । अश्ञीयात् । इन्द्रियम् । एव । आत्मन् । धत्ते । सा ।

वै । एषा । त्रयाणाम् । एव । अवरुद्धेत्यव – रुद्धा ।

सँवथ्सरसद इति सँवथ्सर – सदः । सहस्रयाजिन इति

सहस्र – याजिनः । गृहमेधिन इति गृह – मेधिनः । ते । एव ।

एतया । यजेरन्न् । तेषाम् । एव । एषा । आप्ता ॥ **14 (42)**

*(यथ् – स्वेन – सारस्वतीमा लभेत यः – कामाय त्वा – कामो –*

*ऽप इत्य – भ्रो – द्विचत्वारिँ्शच्च) (A3)*

**TS 3.4.4.1**

चित्तं च चित्तिश्चाऽऽकूतं चाऽऽकूतिश्च विज्ञातं च विज्ञानं च

मनश्च शक्वरीश्च दर्.शश्च पूर्णमासश्च बृहच्च रथन्तरं च

प्रजापतिर्जयानिन्द्राय वृष्णे प्रायच्छदुग्रः पृतनाज्येषु तस्मै विशः

स–मनमन्त सर्वाः स उग्रः सहि हव्यो बभूवदेवासुराः सँयत्ता

आसन्थ् स इन्द्रः प्रजापतिमुपाऽ ( ) धावत् तस्मा एताञ्जयान्

प्रायच्छत् तानजुहोत् ततो वै देवा असुरानजयन्. यदजयन् तज्जयानां

जयत्वᳲ स्पर्द्धमानेनैते होतव्या जयत्येव तां पृतनां ॥ **15**

**TS 3.4.4.1 - Padam**

चित्तम् । च । चित्तिः । च । आकूतमित्या – कूतम् । च ।

आकूतिरित्या – कूतिः । च । विज्ञातमिति वि – ज्ञातम् । च ।

विज्ञानमिति वि–ज्ञानम् । च । मनः । च । शक्वरीः । च । दर्.शः ।

च । पूर्णमास इति पूर्ण – मासः । च । बृहत् । च । रथन्तरमिति

रथं – तरम् । च । प्रजापतिरिति प्रजा – पतिः । जयान् । इन्द्राय ।

वृष्णे । प्रेति । अयच्छत् । उग्रः । पृतनाज्येषु । तस्मै । विशः ।

समिति । अनमन्त । सर्वाः । सः । उग्रः । सः । हि । हव्यः ।

बभूव । देवासुरा इति देव – असुराः । सँयत्ता इति सं – यत्ताः ।

आसन्न् । सः । इन्द्रः । प्रजापतिमिति प्रजा – पतिम् । उपेति ( ) ।

अधावत् । तस्मै । एतान् । जयान् । प्रेति । अयच्छत् । तान् ।

अजुहोत् । ततः । वै । देवाः । असुरान् । अजयन्न् । यत् ।

अजयन्न् । तत् । जयानाम् । जयत्वमिति जय – त्वम् ।

स्पर्द्धमानेन । एते । होतव्याः । जयति । एव । ताम् ।

पृतनाम् ॥ **15 (75)***(उप – पञ्चवि९्शतिश्च) (A4)*

**TS 3.4.5.1**

अग्निर्भूतानामधिपतिः स मा ऽवत्विन्द्रो ज्येष्ठानां ँयमः पृथिव्या

वायुरन्तरिक्षस्य सूर्योदिवश्चन्द्रमा नक्षत्राणां बृहस्पतिर्ब्रह्मणो

मित्रः सत्यानां ँवरुणोऽपा९् समुद्रः स्रोत्यानामन्न९्

साम्राज्यानामधिपति तन्मा ऽवतु सोम ओषधीना९् सविता प्रसवाना९्

रुद्रः पशूनां त्वष्टा रूपाणां ँविष्णुः पर्वतानां मरुतो

गणानामधिपतयस्ते माऽवन्तु पितरः पितामहाः परे ऽवरे ( )

तता–स्ततामहा इह मा ऽवत ।

अस्मिन् ब्रह्मन्नस्मिन् क्षत्रेऽस्यामाशिष्यस्यां पुरोधायामस्मिन्

कर्मन्नस्यां देवहूत्यां ॥ 16

**TS 3.4.5.1 - Padam**

अग्निः । भूतानाम् । अधिपतिरित्यधि– पतिः । सः । मा । अवतु ।

इन्द्रः । ज्येष्ठानाम् । यमः । पृथिव्याः । वायुः । अन्तरिक्षस्य ।

सूर्यः । दिवः । चन्द्रमाः । नक्षत्राणाम् । बृहस्पतिः । ब्रह्मणः ।

मित्रः । सत्यानाम् । वरुणः । अपाम् । समुद्रः । स्रोत्यानाम् ।

अन्नम् । साम्राज्यानामिति सां – राज्यानाम् । अधिपतीत्यधि–पति ।

तत् । मा । अवतु । सोमः । ओषधीनाम् । सविता । प्रसवानामिति

प्र – सवानाम् । रुद्रः । पशूनाम् । त्वष्टा । रूपाणाम् । विष्णुः ।

पर्वतानाम् । मरुतः । गणानाम् । अधिपतय इत्यधि – पतयः । ते ।

मा । अवन्तु । पितरः । पितामहाः । परे । अवरे ( ) । तताः ।

ततामहाः । इह । मा । अवत ॥ अस्मिन्न् । ब्रह्मन्न् । अस्मिन्न् ।

क्षत्रे । अस्याम् । आशिषीत्या – शिषि । अस्याम् ।

पुरोधायामिति पुरः – धायाम् । अस्मिन्न् । कर्मन्न् । अस्याम् ।
देवहूत्यामिति देव – हूत्याम् ॥ **16 (67)**

*(अवरे – सप्तदश च) (A5)*

**<u>TS 3.4.6.1</u>**

देवा वै यद् यज्ञे ऽकुर्वत तदसुरा अकुर्वत ते देवा
एतानभ्यातानानपश्यन् तानभ्यातन्वत यद् देवानां कर्माऽऽ*सीदार्द्ध्यत
तद् यदसुराणां न तदार्द्ध्यत येन कर्मणेर्थ्सेत् तत्र होतव्या ऋद्ध्नोत्येव
तेन कर्मणा यद्विश्वे देवाः समभरन् तस्मादभ्याताना वैश्वदेवायत्–
प्रजापतिर्जयान् प्रायच्छत् तस्माज्जयाः प्राजापत्या – [ ] **17**

**<u>TS 3.4.6.1 - Padam</u>**

देवाः । वै । यत् । यज्ञे । अकुर्वत । तत् । असुराः । अकुर्वत । ते ।
देवाः । एतान् । अभ्यातानानित्यभि – आतानान् । अपश्यन्न् ।
तान् । अभ्यातन्वतेत्यभि – आतन्वत । यत् । देवानाम् । कर्म ।
आसीत् । आर्द्ध्यत । तत् । यत् । असुराणाम् । न । तत् ।
आर्द्ध्यत । येन । कर्मणा । ईर्थ्सेत् । तत्र । होतव्याः । ऋद्ध्नोति ।

एव । तेन । कर्मणा । यत् । विश्वे । देवाः । समभरन्निति

सं – अभरन्न् ।तस्मात् । अभ्याताना इत्यभि – आतानाः । वैश्वदेवा

इति वैश्व – देवाः । यत् । प्रजापतिरिति प्रजा – पतिः । जयान् ।

प्रेति । अयच्छत् । तस्मात् । जयाः ।

प्राजापत्या इति प्राजा–पत्याः । **17 (50)**

**TS 3.4.6.2**

यद्–राष्ट्रभृद्भी राष्ट्रमा ऽददत तद्–राष्ट्रभृताꣳ राष्ट्रभृत्त्वं ते देवा

अभ्यातानै–रसुरानभ्यातन्वत जयैरजयन् राष्ट्रभृद्भी राष्ट्रमाऽददत

यद्देवा अभ्यातानैरसुरानभ्यातन्वत तदभ्यातानानामभ्यातानत्वं

यँज्जयैरजयन् तज्जयानां जयत्वं यँद्–राष्ट्रभृद्भी राष्ट्रमाऽददत

तद्–राष्ट्रभृताꣳ राष्ट्रभृत्त्वं ततो देवा अभवन् पराऽसुरा यो

भ्रातृव्यवान्थ् स्याथ् स ( ) एतान् जुहुयादभ्यातानैरेव

भ्रातृव्यानभ्यातनुते जयैर्जयति राष्ट्रभृद्भी राष्ट्रमा दत्ते भवत्यात्मना

पराऽस्य भ्रातृव्यो भवति ॥ **18**

## TS 3.4.6.2 - Padam

यत् । राष्ट्रभृद्भिरिति राष्ट्रभृत् – भिः । राष्ट्रम् । एति । अददत । तत् ।

राष्ट्रभृतामिति राष्ट्र – भृताम् । राष्ट्रभृत्त्वमिति राष्ट्रभृत् – त्वम् । ते ।

देवाः । अभ्यातानैरित्यभि – आतानैः । असुरान् ।

अभ्यातन्वतेत्यभि – आतन्वत । जयैः । अजयन् ।

राष्ट्रभृद्भिरिति राष्ट्रभृत् – भिः । राष्ट्रम् । एति । अददत । यत् ।

देवाः । अभ्यातानैरित्यभि – आतानैः । असुरान् ।

अभ्यातन्वतेत्यभि – आतन्वत । तत् ।

अभ्यातानानामित्यभि – आतानानाम् ।

अभ्यातानत्वमित्यभ्यातान – त्वम् । यत् । जयैः । अजयन्न् । तत् ।

जयानाम् । जयत्वमिति जय – त्वम् । यत् । राष्ट्रभृद्भिरिति

राष्ट्रभृत् – भिः । राष्ट्रम् । एति । अददत । तत् । राष्ट्रभृतामिति

राष्ट्र – भृताम् । राष्ट्रभृत्त्वमिति राष्ट्रभृत् – त्वम् । ततः । देवाः ।

अभवन्न् । परेति । असुराः । यः । भ्रातृव्यवानिति भ्रातृव्य – वान् ।

स्यात् । सः ( ) । एतान् । जुहुयात् । अभ्यातानैरित्यभि–आतानैः ।

एव । भ्रातृव्यान् । अभ्यातनुत इत्यभि – आतनुते । जयैः । जयति ।
राष्ट्रभृद्भिरिति राष्ट्रभृत् – भिः । राष्ट्रम् । एति । दत्ते । भवति ।
आत्मना । परेति । अस्य । भ्रातृव्यः । भवति ॥ **18 (68)**

*(प्राजापत्याः – सोऽ – ष्टा दश च) (A6)*

**TS 3.4.7.1**

ऋताषाड् ऋतधामाऽग्नि–र्गन्धर्वस्त–स्यौषधयोऽफ्सरस ऊर्जो नाम
स इदं ब्रह्म क्षत्रं पातु ता इदं ब्रह्म क्षत्रं पान्तु तस्मै स्वाहा ताभ्यः
स्वाहा सꣳहितो विश्वसामा सूर्यो गन्धर्व–स्तस्य मरीचयोऽफ्सरस
आयुवः सुषुम्नः सूर्यरश्मि–श्चन्द्रमा गन्धर्व–स्तस्य नक्षत्राण्यफ्सरसो
बेकुरयोभुज्युः सुपर्णो यज्ञो गन्धर्व–स्तस्य दक्षिणा
अफ्सरस स्तवाः प्रजापति–र्विश्वकर्मा मनो – [ ] **19**

**TS 3.4.7.1 - Padam**

ऋताषाट् । ऋतधामेत्यृत – धामा । अग्निः । गन्धर्वः । तस्य ।
ओषधयः । अफ्सरसः । ऊर्जः । नाम । सः । इदम् । ब्रह्म ।
क्षत्रम् । पातु । ताः । इदम् । ब्रह्म । क्षत्रम् । पान्तु । तस्मै । स्वाहा ।

ताभ्यः । स्वाहा । स॒ꣳहि॒त इति॑ सं – हि॒तः । वि॒श्वसा॒मेति॑

वि॒श्व – सा॒मा॒ । सूर्यः॑ । ग॒न्ध॒र्वः । तस्य॑ । मरी॑चयः । अ॒फ्स॒रसः॑ ।

आ॒यु॒व इत्या॑ – यु॒वः । सु॒षु॒म्न इति॑ सु – सु॒म्नः । सूर्य॑रश्मि॒रिति॑

सूर्य॑–र॒श्मिः॒ । च॒न्द्रमाः॑ । ग॒न्ध॒र्वः । तस्य॑ । नक्ष॑त्राणि । अ॒फ्स॒रसः॑ ।

बे॒कु॑रयः । भु॒ज्युः । सु॒प॒र्ण इति॑ सु – प॒र्णः । य॒ज्ञः । ग॒न्ध॒र्वः ।

तस्य॑ । दक्षि॑णाः । अ॒फ्स॒रसः॑ । स्त॒वाः । प्र॒जाप॑ति॒रिति॑ प्र॒जा–प॒तिः॒ ।

वि॒श्वक॑र्मेति वि॒श्व – क॒र्मा॒ । मनः॑ । **19 (50)**

**<u>TS 3.4.7.2</u>**

ग॒न्ध॒र्वस्तस्य॑र्ख्सा॒मान्य॑फ्स॒रसो॒ वह्न॑यइषि॒रो वि॒श्वव्य॑चा॒ वातो॑

ग॒न्ध॒र्व–स्तस्याऽऽ*पो॑ ऽफ्स॒रसो॑ मु॒दाभु॑वनस्य पते॒ यस्य॑ त उ॒परि

गृ॒हा इ॒ह च॑ ।

स नो॑ रा॒स्वाऽज्या॑नि॒ꣳ रा॒यस्पोष॑ꣳ सु॒वीर्य॑ꣳ संवँ॑थ्स॒रीणा॑ꣴ स्व॒स्तिं ॥

प॒र॒मे॒ष्ठ्यधि॑पति–र्मृ॒त्युर् ग॑न्ध॒र्व–स्त॒स्य विश्व॑मफ्स॒रसो॒ भुवः॑ सु॒क्षितिः

सु॒भू॑ति–र्भ॒द्रकृ॑थ् सु॒व॑र्वान् प॒र्जन्यो॑ ग॒न्ध॒र्व–स्त॒स्य॑ वि॒द्युतो॑ ऽफ्स॒रसो॒

रुचो॑ दू॒रे॑हेति–रमृ॒डयो – [ ] **20**

**TS 3.4.7.2 - Padam**

गन्धर्वः । तस्य । ऋख्सामानीत्यृक्–सामानि । अफ्सरसः । वह्नयः ।

इषिरः । विश्वव्यचा इति विश्व – व्यचाः । वातः । गन्धर्वः । तस्य ।

आपः । अफ्सरसः । मुदाः । भुवनस्य । पते । यस्य । ते । उपरि ।

गृहाः । इह । च ॥ सः । नः । रास्व । अज्यानिम् । रायः । पोषम् ।

सुवीर्यमिति सु – वीर्यम् । सँवथ्सरीणामिति सं – वथ्सरीणाम् ।

स्वस्तिम् ॥ परमेष्ठी । अधिपतिरित्यधि – पतिः । मृत्युः । गन्धर्वः ।

तस्य । विश्वम् । अफ्सरसः । भुवः । सुक्षितिरिति सु – क्षितिः ।

सुभूतिरिति सु – भूतिः । भद्रकृदिति भद्र – कृत् । सुवर्वानिति

सुवः – वान् । पर्जन्यः । गन्धर्वः । तस्य । विद्युत इति वि–द्युतः ।

अफ्सरसः । रुचः । दूरेहेतिरिति दूरे – हेतिः । अमृडयः । **20 (50)**

**TS 3.4.7.3**

मृत्युर्गन्धर्व–स्तस्य प्रजा अफ्सरसो भीरुवश्चारुः कृपणकाशी

कामो गन्धर्व–स्तस्याधयो ऽफ्सरसः शोचयन्तीर्नाम स इदं ब्रह्म

क्षत्रं पातु ता इदं ब्रह्म क्षत्रं पान्तु तस्मै स्वाहा ताभ्यः स्वाहा स

नो भुवनस्य पते यस्य त उपरि गृहा इह च ।

उरु ब्रह्मणे ऽस्मै क्षत्राय महि शर्म यच्छ ॥ **21**

**TS 3.4.7.3 - Padam**

मृत्युः । गन्धर्वः । तस्य । प्रजा इति प्र – जाः । अफ्सरसः ।

भीरुवः । चारुः । कृपणकाशीति कृपण–काशी । कामः । गन्धर्वः ।

तस्य । आधय इत्या – धयः । अफ्सरसः । शोचयन्तीः । नाम ।

सः । इदम् । ब्रह्म । क्षत्रम् । पातु । ताः । इदम् । ब्रह्म । क्षत्रम् ।

पान्तु । तस्मै । स्वाहा । ताभ्यः । स्वाहा । सः । नः । भुवनस्य ।

पते । यस्य । ते । उपरि । गृहाः । इह । च ॥ उरु । ब्रह्मणे ।

अस्मै । क्षत्राय । महि । शर्म । यच्छ ॥ **21 (46)**

*(मनो – ऽमृडयः – षट्चत्वारिꣳशच्च) (A7)*

**TS 3.4.8.1**

राष्ट्रकामाय होतव्या राष्ट्रं ँवै राष्ट्रभृतो राष्ट्रेणैवास्मै राष्ट्रमव रुन्धे

राष्ट्रमेव भवत्यात्मने होतव्या राष्ट्रं ँवै राष्ट्रभृतो राष्ट्रं प्रजा राष्ट्रं पशवो

राष्ट्रं ँयच्छ्रेष्ठो भवति राष्ट्रेणैव राष्ट्रमव रुन्धे वसिष्ठः समानानां भवति

ग्रामकामाय होतव्या राष्ट्रं वै राष्ट्रभृतो राष्ट्र८ँ सजाता राष्ट्रेणैवास्मै राष्ट्र८ँ सजातानव रुन्धे ग्राम्ये – [ ] 22

## TS 3.4.8.1 - Padam

राष्ट्रकामायेति राष्ट्र – कामाय । होतव्याः । राष्ट्रम् । वै । राष्ट्रभृत इति राष्ट्र – भृतः । राष्ट्रेण । एव । अस्मै । राष्ट्रम् । अवेति । रुन्धे । राष्ट्रम् । एव । भवति । आत्मने । होतव्याः । राष्ट्रम् । वै । राष्ट्रभृत इति राष्ट्र – भृतः । राष्ट्रम् । प्रजेति प्र – जा । राष्ट्रम् । पशवः । राष्ट्रम् । यत् । श्रेष्ठः । भवति । राष्ट्रेण । एव । राष्ट्रम् । अवेति । रुन्धे । वसिष्ठः । समानानाम् । भवति । ग्रामकामायेति ग्राम – कामाय । होतव्याः । राष्ट्रम् । वै । राष्ट्रभृत इति राष्ट्र–भृतः । राष्ट्रम् । सजाता इति स – जाताः । राष्ट्रेण । एव । अस्मै । राष्ट्रम् । सजातानिति स – जातान् । अवेति । रुन्धे । ग्रामी । 22 (50)

## TS 3.4.8.2

–व भवत्यधिदेवने जुहोत्यधिदेवन एवास्मै सजातानव रुन्धे त एनमवरुद्धा उप तिष्ठन्ते रथमुख ओजस्कामस्य होतव्या ओजो वै

राष्ट्रभृत ओजो रथ ओजसैवास्मा ओजोऽव रुन्ध ओजस्व्येव भवति यो राष्ट्रादपभूतः स्यात् तस्मै होतव्या यावन्तोऽस्य रथाः स्यु-स्तान् ब्रूयाद् युङ्ध्व-मिति राष्ट्रमेवास्मै युनक्त्या – [ ] 23

## TS 3.4.8.2 - Padam

एव । भवति । अधिदेवन इत्यधि – देवने । जुहोति । अधिदेवन इत्यधि – देवने । एव । अस्मै । सजातानिति स–जातान् । अवेति । रुन्धे । ते । एनम् । अवरुद्धा इत्यव – रुद्धाः । उपेति । तिष्ठन्ते । रथमुख इति रथ – मुखे । ओजस्कामस्येत्योजः – कामस्य । होतव्याः । ओजः । वै । राष्ट्रभृत इति राष्ट्र–भृतः । ओजः । रथः । ओजसा । एव । अस्मै । ओजः । अवेति । रुन्धे । ओजस्वी । एव । भवति । यः । राष्ट्रात् । अपभूत इत्यप – भूतः । स्यात् । तस्मै । होतव्याः । यावन्तः । अस्य । रथाः । स्युः । तान् । ब्रूयात् । युङ्ध्वम् । इति । राष्ट्रम् । एव । अस्मै । युनक्ति । 23 (50)

## TS 3.4.8.3

हुतयो वा एतस्याक्लृप्ता यस्य राष्ट्रं न कल्पते स्वरथस्य दक्षिणं चक्रं प्रवृह्य नाडीमभि जुहुयादाहुतीरेवास्य कल्पयति ता अस्य

कल्पमाना राष्ट्रमनु कल्पते संग्रामे सँयत्ते होतव्या राष्ट्रं वै
राष्ट्रभृतो राष्ट्रे खलु वा एते व्यायच्छन्ते ये सङ्ग्राम॒ँ सँयन्ति
यस्य पूर्वस्य जुह्वति स एव भवति जयति त॒ँ संग्रामं मान्धुक
इद्ध्मो– [ ] **24**

**TS 3.4.8.3 - Padam**

आहुतय इत्या – हुतयः । वै । एतस्य । अक्लृप्ताः । यस्य ।
राष्ट्रम् । न । कल्पते । स्वरथस्येति स्व – रथस्य । दक्षिणम् ।
चक्रम् । प्रवृह्येति प्र – वृह्य । नाडीम् । अभीति । जुहुयात् ।
आहुतीरित्या – हुतीः । एव । अस्य । कल्पयति । ताः । अस्य ।
कल्पमानाः । राष्ट्रम् । अन्विति । कल्पते । संग्राम इति सं – ग्रामे ।
सँयत्त इति सं – यत्ते । होतव्याः । राष्ट्रम् । वै । राष्ट्रभृत इति
राष्ट्र – भृतः । राष्ट्रे । खलु । वै । एते । व्यायच्छन्त इति
वि – आयच्छन्ते । ये । संग्राममिति सं – ग्रामम् । सँयन्तीति
सं–यन्ति । यस्य । पूर्वस्य । जुह्वति । सः । एव । भवति । जयति ।
तम् । संग्राममिति सं – ग्रामम् । मान्धुकः । इद्ध्मः । **24 (50)**

**TS 3.4.8.4**

भवत्यङ्गारा एव प्रतिवेष्टमाना अमित्राणामस्य सेनां

प्रति वेष्टयन्ति य उन्माद्येत् तस्मै होतव्या गन्धर्वाफ्सरसो वा

एतमुन्मादयन्ति य उन्माद्यत्येते खलु वै गन्धर्वाफ्सरसो

यद्राष्ट्रभृतस्तस्मै स्वाहा ताभ्यः स्वाहेति जुहोति तेनैवैनाञ्छमयति

नैयग्रोध औदुम्बर आश्वत्थः प्लाक्ष इतीद्ध्मो भवत्येते वै

गन्धर्वाफ्सरसां गृहाः स्व एवैना – [ ] **25**

**TS 3.4.8.4 - Padam**

भवति । अङ्गाराः । एव । प्रतिवेष्टमाना इति प्रति – वेष्टमानाः ।

अमित्राणाम् । अस्य । सेनाम् । प्रतीति । वेष्टयन्ति । यः ।

उन्माद्येदित्युत् – माद्येत् । तस्मै । होतव्याः । गन्धर्वाफ्सरस इति

गन्धर्व – अफ्सरसः । वै । एतम् । उदिति । मादयन्ति । यः ।

उन्माद्यतीत्युत् – माद्यति । एते । खलु । वै । गन्धर्वाफ्सरस इति

गन्धर्व – अफ्सरसः । यत् । राष्ट्रभृत इति राष्ट्र – भृतः । तस्मै ।

स्वाहा । ताभ्यः । स्वाहा । इति । जुहोति । तेन । एव । एनान् ।

शमयति । नैयग्रोधः । औदुंबरः । आश्वत्थः । प्लाक्षः । इति ।

इ॒द्ध्मः । भ॒व॒ति॒ । ए॒ते । वै ।

ग॒न्ध॒र्वा॒प्स॒रसा॒मिति॑ गन्धर्व – अ॒प्स॒रसा॑म् । गृ॒हाः ।

स्वे । ए॒व । ए॒ना॒न् । **25 (50)**

**<u>TS 3.4.8.5</u>**

ना॒यत॑ने शमयत्यभि॒चर॑ता प्रतिलो॒मꣳ हो॑त॒व्या॑ः प्रा॒णाने॒वास्य॑

प्र॒ती॒चः प्रति॑ यौति॒ तं तत॒ो ये॒न के॑न च स्तृणु॒ते स्वकृ॒त॑ इरिणे

जुहोति प्र॒दरे॒ वैतद्वा अ॒स्यै निर्.ऋ॑तिगृही॒तं निर्.ऋ॑तिगृहीत ए॒वै॒नं

निर्.ऋ॑त्या ग्राहयति॒ यद्वा॒चः क्रू॒रं ते॒न व॑षट् करोति वा॒च ए॒वै॑नं क्रू॒रे॒ण

प्र वृ॑श्चति ता॒जगा॒र्ति॑मार्च्छ॒ति यस्य॑ का॒मये॒ता॒न्ना॒द्य – [ ] **26**

**<u>TS 3.4.8.5 - Padam</u>**

आ॒यत॒॑न इत्या॑ – यत॑ने । श॒म॒य॒ति॒ । अ॒भि॒च॒रतेत्य॑भि – चर॑ता ।

प्र॒ति॒लो॒ममिति॑ प्रति – लो॒मम् । हो॒त॒व्या॑ः । प्रा॒णानिति॑ प्र – अ॒नान् ।

ए॒व । अ॒स्य॒ । प्र॒तीचः॑ । प्रतीति॑ । यौ॒ति॒ । तम् । ततः॑ । येन॑ । केन॑ ।

च॒ । स्तृ॒णु॒ते॒ । स्वकृ॑त॒ इति॒ स्व – कृ॒ते॒ । इरिणे । जु॒हो॒ति॒ ।

प्रदर इति प्र – दरे । वा । एतत् । वै । अस्यै । निर्.ऋतिगृहीतमिति

निर्.ऋति – गृहीतम् । निर्.ऋतिगृहीत इति निर्.ऋति–गृहीते । एव ।

एनम् । निर्.ऋत्येति निः–ऋत्या । ग्राहयति । यत् । वाचः । क्रूरम् ।

तेन । वषट् । करोति । वाचः । एव । एनम् । क्रूरेण । प्रेति ।

वृश्चति । ताजक् । आर्तिम् । एति । ऋच्छति । यस्य । कामयेत ।

अन्नाद्यमित्यन्न – अद्यम् । **26 (50)**

**TS 3.4.8.6**

मा ददीयेति तस्य सभायामुत्तानो निपद्य भुवनस्य पत इति

तृणानि सं गृह्णीयात् प्रजापतिर्वै भुवनस्य पतिः

प्रजापतिनैवास्यान्नाद्यमा दत्त इदमहममुष्या ऽऽमुष्यायणस्यान्नाद्यꣳ

हरामीत्याहान्नाद्यमेवास्य हरति षड्भिर्. हरति षड्वा ऋतवः

प्रजापतिनैवास्या–न्नाद्यमादायर्तवोऽस्मा अनु प्र यच्छन्ति – [ ] **27**

**TS 3.4.8.6 - Padam**

एति । ददीय । इति । तस्य । सभायाम् । उत्तान इत्युत् – तानः ।

निपद्येति नि – पद्य । भुवनस्य । पते । इति । तृणानि । समिति ।

गृह्णीयात् । प्रजापतिरिति प्रजा – पतिः । वै । भुवनस्य । पतिः ।

प्रजापतिनेति प्रजा – पतिना । एव । अस्य ।

अन्नाद्यमित्यन्न – अद्यम् । एति । दत्ते । इदम् । अहम् । अमुष्य ।

आमुष्यायणस्य । अन्नाद्यमित्यन्न – अद्यम् । हरामि । इति । आह ।

अन्नाद्यमित्यन्न – अद्यम् । एव । अस्य । हरति ।

षड्भिरिति षट् – भिः । हरति । षट् । वै । ऋतवः ।

प्रजापतिनेति प्रजा–पतिना । एव । अस्य । अन्नाद्यमित्यन्न –अद्यम् ।

आदायेत्या–दाय । ऋतवः । अस्मै । अनु । प्रेति ।

यच्छन्ति । **27 (50)**

**TS 3.4.8.7**

यो ज्येष्ठबन्धुरप भूतः स्यात् तꣳस्थलेऽवसाय्य ब्रह्मौदनं चतुश्शरावं

पक्त्वा तस्मै होतव्या वर्ष्म वै राष्ट्रभृतो वर्ष्म स्थलं ँवर्ष्मणैवैनं ँवर्ष्म

समानानां गमयति चतुश्शरावो भवति दिक्ष्वेव प्रति तिष्ठति क्षीरे

भवति रुचमेवास्मिन् दधात्युद्धरति शृतत्वाय सर्पिष्वान् भवति

मेद्ध्यत्वाय चत्वार आर्.षेयाः प्राश्ञन्ति दिशामेव ज्योतिषि

जुहोति ॥ **28**

## TS 3.4.8.7 - Padam

यः । ज्येष्ठबन्धुरिति ज्येष्ठ – बन्धुः । अपभूत इत्यप – भूतः । स्यात् । तम् । स्थले । अवसाय्येत्यव – साय्य । ब्रह्मौदनमिति ब्रह्म – ओदनम् । चतुश्शरावमिति चतुः – शरावम् । पक्त्वा । तस्मै । होतव्याः । वर्ष्मे । वै । राष्ट्रभृत इति राष्ट्र – भृतः । वर्ष्मे । स्थलम् । वर्ष्मणा । एव । एनम् । वर्ष्मे । समानानाम् । गमयति । चतुश्शराव इति चतुः – शरावः । भवति । दिक्षु । एव । प्रतीति । तिष्ठति । क्षीरे । भवति । रुचम् । एव । अस्मिन्न् । दधाति । उदिति । हरति । शृतत्वायेति शृत – त्वाय । सर्पिष्वान् । भवति । मेद्ध्यत्वायेति मेद्ध्य–त्वाय । चत्वारः । आर्.षेयाः । प्रेति । अश्ञन्ति । दिशाम् । एव । ज्योतिषि । जुहोति ॥ **28 (49)**

*(ग्रामी – युनक्ती – ध्मः – स्व एवैना – नन्नाद्यं – यँच्छन्त्ये – कान्नपञ्चाशच्च) (A8)*

**TS 3.4.9.1**

देविका निर्वपेत् प्रजाकामश्छन्दाꣳसि वै देविकाश्छन्दाꣳसीव
खलु वै प्रजाश्छन्दोभिरेवास्मै प्रजाः प्र जनयति प्रथमं धातारं
करोति मिथुनी एव तेन करोत्यन्वेवास्मा अनुमतिर्मन्यते राते राका
प्र सिनीवाली जनयति प्रजास्वेव प्रजातासु कुह्वा वाचं दधात्येता एव
निर्वपेत् पशुकामश्छन्दाꣳसि वै देविकाश्छन्दाꣳसी – [ ] **29**

**TS 3.4.9.1 - Padam**

देविकाः । निरिति । वपेत् । प्रजाकाम इति प्रजा – कामः ।
छन्दाꣳसि । वै । देविकाः । छन्दाꣳसि । इव । खलु । वै ।
प्रजा इति प्र–जाः । छन्दोभिरिति छन्दः – भिः । एव । अस्मै ।
प्रजा इति प्र–जाः । प्रेति । जनयति । प्रथमम् । धातारम् । करोति ।
मिथुनी । एव । तेन । करोति । अन्विति । एव । अस्मै ।
अनुमतिरित्यनु – मतिः । मन्यते । राते । राका । प्रेति । सिनीवाली ।
जनयति । प्रजास्विति प्र – जासु । एव । प्रजातास्विति
प्र – जातासु । कुह्वा । वाचम् । दधाति । एताः । एव । निरिति ।

वपेत् । पशुकाम इति पशु – कामः । छन्दाꣳसि । वै । देविकाः । छन्दाꣳसि । **29 (50)**

**TS 3.4.9.2**

व खलु वै पशवश्छन्दोभिरेवास्मै पशून् प्र जनयति प्रथमं धातारं करोति प्रैव तेन वापयत्यन्वेवास्मा अनुमतिर्मन्यते राते राका प्र सिनीवाली जनयति पशूनेव प्रजातान् कुह्वा प्रति ष्ठापयत्येता एव निर्वपेद्–ग्रामकामश्छन्दाꣳसि वै देविकाश्छन्दाꣳसी व खलु वै ग्रामश्छन्दोभिरेवास्मै ग्राम – [ ] **30**

**TS 3.4.9.2 - Padam**

इव । खलु । वै । पशवः । छन्दोभिरिति छन्दः – भिः । एव । अस्मै । पशून् । प्रेति । जनयति । प्रथमम् । धातारम् । करोति । प्रेति । एव । तेन । वापयति । अन्विति । एव । अस्मै । अनुमतिरित्यनु – मतिः । मन्यते । राते । राका । प्रेति । सिनीवाली । जनयति । पशून् । एव । प्रजातानिति प्र–जातान् । कुह्वा । प्रतीति । स्थापयति । एताः । एव । निरिति । वपेत् । ग्रामकाम इति ग्राम – कामः । छन्दाꣳसि । वै । देविकाः । छन्दाꣳसि । इव ।

खलु । वै । ग्रामः । छन्दोभिरिति छन्दः – भिः । एव । अस्मै । ग्रामम् । **30 (50)**

**TS 3.4.9.3**

मव रुन्धे मद्ध्यतो धातारं करोति मद्ध्यत एवैनं ग्रामस्य दधात्येता एव निर्वपेज्ज्योगामयावी छन्दाꣳसि वै देविकाश्छन्दाꣳसि खलु वा एतमभि मन्यन्ते यस्य ज्योगामयति छन्दोभिरेवैन–मगदं करोति मद्ध्यतो धातारं करोति मद्ध्यतो वा एतस्याक्लृप्तं ँयस्य ज्योगामयति मद्ध्यत एवास्य तेन कल्पयत्येता एव नि – [ ] **31**

**TS 3.4.9.3 - Padam**

अवेति । रुन्धे । मद्ध्यतः । धातारम् । करोति । मद्ध्यतः । एव । एनम् । ग्रामस्य । दधाति । एताः । एव । निरिति । वपेत् । ज्योगामयावीति ज्योक् – आमयावी । छन्दाꣳसि । वै । देविकाः । छन्दाꣳसि । खलु । वै । एतम् । अभीति । मन्यन्ते । यस्य । ज्योक् । आमयति । छन्दोभिरिति छन्दः – भिः । एव । एनम् । अगदम् । करोति । मद्ध्यतः । धातारम् । करोति । मद्ध्यतः । वै ।

एतस्य । अक्लृप्तम् । यस्य । ज्योक् । आमयति । मद्ध्यतः । एव । अस्य । तेन । कल्पयति । एताः । एव । निरिति । **31 (50)**

**TS 3.4.9.4**

र्वपेद्यं ँयज्ञो नोपनमेच्छन्दाꣳसि वै देविकाश्छन्दाꣳसि खलु वा एतं नोप नमन्ति यं ँयज्ञो नोपनमति प्रथमं धातारं करोति मुखत एवास्मै छन्दाꣳसि दधात्युपैनं ँयज्ञो नमत्येता एव निर्वपेदीजानश्छन्दाꣳसि वै देविका यातयामानीव खलु वा एतस्य छन्दाꣳसि य ईजान उत्तमं धातारं करो – [ ] **32**

**TS 3.4.9.4 - Padam**

वपेत् । यम् । यज्ञः । न । उपनमेदित्युप – नमेत् । छन्दाꣳसि । वै । देविकाः । छन्दाꣳसि । खलु । वै । एतम् । न । उपेति । नमन्ति । यम् । यज्ञः । न । उपनमतीत्युप – नमति । प्रथमम् । धातारम् । करोति । मुखतः । एव । अस्मै । छन्दाꣳसि । दधाति । उपेति । एनम् । यज्ञः । नमति । एताः । एव । निरिति । वपेत् । ईजानः । छन्दाꣳसि । वै । देविकाः । यातयामानीति यात – यामानि । इव ।

खलु । वै । एतस्य । छन्दा॒ꣳसि । यः । ईजानः ।

उत्तममित्युत् – तमम् । धातारम् । करोति । **32 (50)**

**TS 3.4.9.5**

–त्युपरिष्टादेवास्मै छन्दाꣳस्ययातयामान्यव रुन्ध उपैनमुत्तरो

यज्ञो नमत्येता एव निर्वपेद्यं मेधा नोपनमेच्छन्दाꣳसि वै

देविकाश्छन्दाꣳसि खलु वा एतं नोप नमन्ति यं मेधा नोपनमति

प्रथमं धातारं करोति मुखत एवास्मै छन्दाꣳसि दधात्युपैनं

मेधा नमत्येता एव निर्वपे – [ ] **33**

**TS 3.4.9.5 - Padam**

उपरिष्टात् । एव । अस्मै । छन्दाꣳसि ।

अयातयामानीत्ययात – यामानि । अवेति । रुन्धे । उपेति । एनम् ।

उत्तर इत्युत् – तरः । यज्ञः । नमति । एताः । एव । निरिति । वपेत् ।

यम् । मेधा । न । उपनमेदित्युप – नमेत् । छन्दाꣳसि । वै ।

देविकाः । छन्दाꣳसि । खलु । वै । एतम् । न । उपेति । नमन्ति ।

यम् । मेधा । न । उपनमतीत्युप – नमति । प्रथमम् । धातारम् ।

करोति । मुखतः । एव । अस्मै । छन्दाꣳसि । दधाति । उपेति ।
एनम् । मेधा । नमति । एताः । एव । निरिति । वपेत् । **33 (50)**

**TS 3.4.9.6**

दुक्कामश्छन्दाꣳसि वै देविकाश्छन्दाꣳसीव खलु वै रुक्
छन्दोभिरेवास्मिन् रुचं दधातिक्षीरे भवन्ति रुचमेवास्मिन् दधति
मद्ध्यतो धातारं करोति मद्ध्यत एवैनꣳ रुचो दधातिगायत्री वा
अनुमतिस्त्रिष्टुग्राका जगती सिनीवाल्यनुष्टुप् कुहूर्द्धाता वषट्कारः
पूर्वपक्षो राकाऽपरपक्षः कुहूरमावास्या सिनीवाली
पौर्णमास्यनुमतिश्चन्द्रमा धाताऽष्टौ – [ ] **34**

**TS 3.4.9.6 - Padam**

रुक्काम इति रुक्–कामः । छन्दाꣳसि । वै । देविकाः । छन्दाꣳसि ।
इव । खलु । वै । रुक् । छन्दोभिरिति छन्दः–भिः । एव ।
अस्मिन्न् । रुचम् । दधाति । क्षीरे । भवन्ति । रुचम् । एव ।
अस्मिन्न् । दधति । मद्ध्यतः । धातारम् । करोति । मद्ध्यतः । एव ।
एनम् । रुचः । दधाति । गायत्री । वै । अनुमतिरित्यनु – मतिः ।
त्रिष्टुक् । राका । जगती । सिनीवाली । अनुष्टुबित्यनु – स्तुप् ।

कुहूः । धाता । वषट्कार इति वषट् – कारः ।

पूर्वपक्ष इति पूर्व – पक्षः । राका । अपरपक्ष इत्यपर – पक्षः ।

कुहूः । अमावास्येत्यमा – वास्या । सिनीवाली ।

पौर्णमासीति पौर्ण – मासी । अनुमतिरित्यनु – मतिः ।

चन्द्रमाः । धाता । अष्टौ । **34 (50)**

**TS 3.4.9.7**

वसवोऽष्टाक्षरा गायत्र्येकादश रुद्रा एकादशाक्षरा त्रिष्टुब्

द्वादशाऽऽ*दित्या द्वादशाक्षरा जगती प्रजापतिरनुष्टुब् धाता वषट्कार

एतद्वै देविकाः सर्वाणि च छन्दाꣳसि सर्वाश्च देवता वषट्कारस्ता

यथ् सह सर्वा निर्वपेदीश्वरा एनं प्रदहो द्वे प्रथमे निरुप्य धातुस्तृतीयं

निर्वपेत् तथो एवोत्तरे निर्वपेत् तथैनं न प्र दहन्त्य ( ) थो यस्मै

कामाय निरुप्यन्ते तमेवाऽऽभि–रुपाऽऽ*प्नोति ॥ **35**

**TS 3.4.9.7 - Padam**

वसवः । अष्टाक्षरेत्यष्टा – अक्षरा । गायत्री । एकादश । रुद्राः ।

एकादशाक्षरेत्येकादश – अक्षरा । त्रिष्टुप् । द्वादश । आदित्याः ।

द्वादशाक्षरेति द्वादश–अक्षरा । जगती । प्रजापतिरिति प्रजा – पतिः । अनुष्टुबित्यनु–स्तुप् । धाता । वषट्कार इति वषट् – कारः । एतत् । वै । देविकाः । सर्वाणि । च । छन्दाᳪंसि । सर्वाः । च । देवताः । वषट्कार इति वषट् – कारः । ताः । यत् । सह । सर्वाः । निर्वपेदिति निः – वपेत् । ईश्वराः । एनम् । प्रदह इति प्र – दहः । द्वे इति । प्रथमे इति । निरुप्येति निः – उप्य । धातुः । तृतीयम् । निरिति । वपेत् । तथो इति । एव । उत्तरे इत्युत् – तरे । निरिति । वपेत् । तथा । एनम् । न । प्रेति । दहन्ति ( ) । अथो इति । यस्मै । कामाय । निरुप्यन्त इति निः – उप्यन्ते । तम् । एव । आभिः । उपेति । आप्नोति ॥ **35 (59)** ***(पशुकामश्छन्दाᳪंसि वै देविका श्छन्दाᳪंसि–ग्रामं–कल्पयत्येता एव नि–रुत्तमन्धातारं करोति – मेधा नमत्येता एव निर्वपे – दष्टौ – दहन्ति – नव च)*** *(A9)*

**Special Korvai:**

**(देविकाः प्रजाकामो मिथुनी पशुकामः प्रैव ग्रामकामो ज्योगामयावी**

**यं ँयज्ञो य ईजानो यं मेधा रुक्कामोऽष्टौ ।**

**देविका भवन्ति दधति राष्ट्रकामाय भवति दधाति ।)**

**TS 3.4.10.1**

वास्तोष्पते प्रति जानी ह्यस्मान्थ् स्वावेशो अनमीवो **भवा** नः ।

यत् त्वेमहे प्रति तन्नो जुषस्व शन्न एधि द्विपदे शञ्चतुष्पदे ॥

वास्तोष्पते शग्मया सꣳसदा ते सक्षीमहि रण्वया गातुमत्या ।

आवः क्षेम उत योगे वरन्नो यूयं पात स्वस्तिभिः सदा नः ॥

यथ् सायंप्रातरग्निहोत्रं जुहोत्याहुतीष्टका एव ता उप

धत्ते – [ ] 36

**TS 3.4.10.1 - Padam**

वास्तोः । पते । प्रतीति । जानीहि । अस्मान् । स्वावेश इति

सु–आवेशः । अनमीवः । भव । नः ॥ यत् । त्वा । ईमहे । प्रतीति ।

तत् । नः । जुषस्व । शम् । नः । एधि । द्विपद इति द्वि – पदे ।

शम् । चतुष्पद इति चतुः – पदे ॥ वास्तोः । पते । शग्मया ।
स॒ꣳसदेति सं – सदा । ते । सक्षीमहि । रण्वया । गातुमत्येति
गातु – मत्या ॥ आवः । क्षेमे । उत । योगे । वरम् । नः ।
यूयम् । पात । स्वस्तिभिरिति स्वस्ति – भिः । सदा । नः ॥ यत् ।
सायंप्रातरिति सायं – प्रातः । अग्निहोत्रमित्यग्नि – होत्रम् ।
जुहोति । आहुतीष्टका इत्याहुति – इष्टकाः । एव । ताः । उपेति ।
धत्ते । **36 (50)**

**TS 3.4.10.2**

यजमानोऽहोरात्राणि वा एतस्येष्टका य आहिताग्निर्यथ्
सायं प्रातर्जुहोत्यहोरात्राण्येवा ऽऽ*प्त्वेष्टकाः कृत्वोप धत्ते दश
समानत्र जुहोति दशाक्षरा विराड् विराजमेवा ऽऽप्त्वेष्टकां कृत्वोप
धत्ते ऽथो विराज्येव यज्ञमाप्नोति चित्यश्चित्यो ऽस्य भवति तस्माद्
यत्र दशोषित्वा प्रयाति तद्–यज्ञवास्त्ववास्त्वेव तद् यत्
ततोऽर्वाचीनꣳ – [ ] **37**

**TS 3.4.10.2 - Padam**

यजमानः । अहोरात्राणीत्यहः-रात्राणि । वै । एतस्य । इष्टकाः । यः ।
आहिताग्निरित्याहित - अग्निः । यत् । सायंप्रातरिति सायं-प्रातः ।
जुहोति । अहोरात्राणीत्यहः - रात्राणि । एव । आप्त्वा । इष्टकाः ।
कृत्वा । उपेति । धत्ते । दश । समानत्र । जुहोति । दशाक्षरेति
दश - अक्षरा । विराडिति वि - राट् । विराजमिति वि - राजम् ।
एव । आप्त्वा । इष्टकाम् । कृत्वा । उपेति । धत्ते । अथो इति ।
विराजीति वि - राजि । एव । यज्ञम् । आप्नोति ।
चित्यश्चित्य इति चित्यः - चित्यः । अस्य । भवति । तस्मात् ।
यत्र । दश । उषित्वा । प्रयातीति प्र - याति । तत् ।
यज्ञवास्त्विति यज्ञ-वास्तु । अवास्तु । एव । तत् । यत् । ततः ।
अर्वाचीनम् । **37 (50)**

**TS 3.4.10.3**

रुद्रः खलु वै वास्तोष्पतिर्यदहुत्वा वास्तोष्पतीयं प्रयायाद् रुद्र एनं
भूत्वाऽग्निरनूत्थाय हन्याद् वास्तोष्पतीयं जुहोति भागधेयेनैवैनꣳ

शमयति नाऽऽ*र्तिमार्च्छति यजमानो यद् युक्ते जुहुयाद्यथा प्रयाते वास्तावाहुतिं जुहोति तादृगेव तद् यदयुक्ते जुहुयाद् यथा क्षेम आहुतिं जुहोति तादृगेव तदहुतमस्य वास्तोष्पतीयꣳ स्या – [ ] **38**

**TS 3.4.10.3 - Padam**

रुद्रः । खलु । वै । वास्तोष्पतिरिति वास्तोः–पतिः । यत् । अहुत्वा । वास्तोष्पतीयमिति वास्तोः – पतीयम् । प्रयायादिति प्र – यायात् । रुद्रः । एनम् । भूत्वा । अग्निः । अनूत्थायेत्यनु – उत्थाय । हन्यात् । वास्तोष्पतीयमिति वास्तोः – पतीयम् । जुहोति । भागधेयेनेति भाग – धेयेन । एव । एनम् । शमयति । न । आर्तिम् । एति । ऋच्छति । यजमानः । यत् । युक्ते । जुहुयात् । यथा । प्रयात इति प्र – याते । वास्तौ । आहुतिमित्या–हुतिम् । जुहोति । तादृक् । एव । तत् । यत् । अयुक्ते । जुहुयात् । यथा । क्षेमे । आहुतिमित्या – हुतिम् । जुहोति । तादृक् । एव । तत् । अहुतम् । अस्य । वास्तोष्पतीयमिति वास्तोः – पतीयम् । स्यात् । **38 (50)**

**TS 3.4.10.4**

दक्षिणो युक्तो भवति सव्योऽयुक्तोऽथ वास्तोष्पतीयं जुहोत्युभयमेवाऽ
करपरिवर्गमेवैन९ं शमयति यदेकया जुहुयाद् दर्विहोमं कुर्यात्
पुरोनुवाक्या मनूच्य याज्यया जुहोति सदेवत्वाय यद्धुत आदद्ध्याद्
रुद्रं गृहानन्वारोहयेद्–यदवक्षाणान्यसंप्रक्षाप्य प्रयायाद् यथा
यज्ञवेशसं ँवाऽऽदहनं ँवा तादृगेव तदयन्ते योनिर्.ऋत्विय इत्यरण्योः
समारोहय – [ ] **39**

**TS 3.4.10.4 - Padam**

दक्षिणः । युक्तः । भवति । सव्यः । अयुक्तः । अथ ।
वास्तोष्पतीयमिति वास्तोः –पतीयम् । जुहोति । उभयम् । एव ।
अकः । अपरिवर्गमित्यपरि – वर्गम् । एव । एनम् । शमयति । यत् ।
एकया । जुहुयात् । दर्विहोममिति दर्वि – होमम् । कुर्यात् ।
पुरोनुवाक्यामिति पुरः – अनुवाक्याम् । अनूच्येत्यनु – उच्य ।
याज्यया । जुहोति । सदेवत्वायेति सदेव – त्वाय । यत् । हुते ।
आदद्ध्यादित्या – दद्ध्यात् । रुद्रम् । गृहान् ।

अन्वारोहयेदित्यनु – आरोहयेत् । यत् ।

अवक्षाणानीत्यव – क्षाणानि । असंप्रक्षाप्येत्यसं – प्रक्षाप्य ।

प्रयायादिति प्र – यायात् । यथा । यज्ञवेशसमिति यज्ञ – वेशसम् ।

वा । आदहनमित्या – दहनम् । वा । तादृक् । एव । तत् । अयम् ।

ते । योनिः । ऋत्वियः । इति । अरण्योः ।

समारोहयतीति सं – आरोहयति । **39 (50)**

**TS 3.4.10.5**

–त्येष वा अग्नेर्योनिः स्व एवैनं ँयोनौ समारोहयत्यथो

खल्वाहुर्यदरण्योः समारूढो नश्येदुदस्याग्निः सीदेत् पुनराधेयः

स्यादिति या ते अग्ने यज्ञिया तनूस्तयेह्या रोहेत्यात्मन्थ् समारोहयते

यजमानो वा अग्नेर्योनिः स्वायामेवैनं ँयोन्या८ समारोहयते ॥ **40**

**TS 3.4.10.5 - Padam**

एषः । वै । अग्नेः । योनिः । स्वे । एव । एनम् । योनौ ।

समारोहयतीति सं–आरोहयति । अथो इति । खलु । आहुः । यत् ।

अरण्योः । समारूढ इति सं–आरूढः । नश्येत् । उदिति । अस्य ।

अग्निः । सीदेत् । पुनराधेय इति पुनः – आधेयः । स्यात् । इति ।

या । ते । अग्ने । यज्ञिया । तनूः । तया । एति । इहि । एति । रोह । इति । आत्मन्न् । समारोहयत इति सं–आरोहयते । यजमानः । वै । अग्नेः । योनिः । स्वायाम् । एव । एनम् । योन्याम् । समारोहयत इति सं – आरोहयते ॥ **40 (45)** *(धत्ते– ऽर्वाचीन७ं –स्याथ्– समारोहयति –पञ्चचत्वारि७ंशच्च) (A10)*

**TS 3.4.11.1**

त्व–मग्ने बृहद् वयो दधासि देव दाशुषे ।
कविर्गृहपतिर्युवा ॥
हव्यवाडग्नि–रजरः पिता नो विभुर्विभावा सुदृशीको अस्मे ।
सुगार्.हपत्याः समिषो दिदीह्यस्मद्रियख् सं मिमीहि श्रवा७ंसि ॥
त्वं च सोम नो वशो जीवातुं न मरामहे ।
प्रियस्तोत्रो वनस्पतिः ॥
ब्रह्मा देवानां पदवीः कवीनामृषिर्विप्राणां महिषो मृगाणां ।
श्येनो गृद्ध्राणा७ं स्वधिति र्वनाना७ं सोमः – [ ] **41**

## TS 3.4.11.1 - Padam

त्वम् । अग्ने । बृहत् । वयः । दधासि । देव । दाशुषे ॥ कविः ।
गृहपतिरिति गृह – पतिः । युवा ॥ हव्यवाडिति हव्य – वाट् ।
अग्निः । अजरः । पिता । नः । विभुरिति वि – भुः । विभावेति
वि – भावा । सुदृशीक इति सु – दृशीकः । अस्मे इति ॥
सुगार्.हपत्या इति सु – गार्.हपत्याः । समिति । इषः । दिदीहि ।
अस्मद्रियगित्यस्म – द्रियक् । समिति । मिमीहि । श्रवा(ग्ं)सि ॥
त्वम् । च । सोम । नः । वशः । जीवातुम् । न । मरामहे ॥
प्रियस्तोत्र इति प्रिय – स्तोत्रः । वनस्पतिः ॥ ब्रह्मा । देवानाम् ।
पदवीरिति पद – वीः । कवीनाम् । ऋषिः । विप्राणाम् । महिषः ।
मृगाणाम् ॥ श्येनः । गृद्ध्राणाम् । स्वधितिरिति स्व – धितिः ।
वनानाम् । सोमः । **41 (50)**

## TS 3.4.11.2

पवित्रमत्येति रेभन्न् ॥
आ विश्वदेव(ग्ं) सत्पति(ग्ं) सूक्तैरद्या वृणीमहे ।
सत्यसव(ग्ं) सवितारं ॥

आसत्येन रजसा वर्तमानो निवेशयन्नमृतं मर्त्यञ्च ।
हिरण्ययेन सविता रथेना ऽऽ देवो याति भुवना विपश्यन्न् ॥
यथा नो अदितिः करत् पश्वे नृभ्यो यथा गवे ।
यथा तोकाय रुद्रियं ॥
मा नस्तोके तनये मा न आयुषि मा नो गोषु मा– [ ] **42**

**TS 3.4.11.2 - Padam**

पवित्रम् । अतीति । एति । रेभन्न् ॥ एति । विश्वदेवमिति विश्व – देवम् । सत्पतिमिति सत् – पतिम् । सूक्तैरिति सु–उक्तैः । अद्य । वृणीमहे ॥ सत्यसवमिति सत्य–सवम् । सवितारम् ॥ एति । सत्येन । रजसा । वर्तमानः । निवेशयन्निति नि–वेशयन्न् । अमृतम् । मर्त्यम् । च ॥ हिरण्ययेन । सविता । रथेन । एति । देवः । याति । भुवना । विपश्यन्निति वि–पश्यन्न् ॥ यथा । नः । अदितिः । करत् । पश्वे । नृभ्य इति नृ – भ्यः । यथा । गवे ॥ यथा । तोकाय । रुद्रियम् ॥ मा । नः । तोके । तनये । मा । नः । आयुषि । मा । नः । गोषु । मा । **42 (50)**

**TS 3.4.11.3**

नो अश्वेषु रीरिषः ।

वीरान् मा नो रुद्र भामितो वधीर्. हविष्मन्तो नमसा विधेम ते ॥

उदप्रुतो न वयो रक्षमाणा वावदतो अभ्रियस्येव घोषाः ।

गिरिभ्रजो नोर्मयो मदन्तो बृहस्पतिमभ्यर्का अनावन्न् ॥

हꣳसैरिव सखिभिर्वावदद्भिरश्मन्मयानि नहना व्यस्यन्न् ।

बृहस्पतिरभिकनिक्रदद् गा उत प्रास्तौदुच्च विद्वाꣳ अगायत् ॥

एन्द्र सानसिꣳ रयिꣳ - [ ] **43**

**TS 3.4.11.3 - Padam**

नः । अश्वेषु । रीरिषः ॥ वीरान् । मा । नः । रुद्र । भामितः । वधीः ।

हविष्मन्तः । नमसा । विधेम । ते ॥ उदप्रुत इत्युद - प्रुतः । न ।

वयः । रक्षमाणाः । वावदतः । अभ्रियस्य । इव । घोषाः ॥

गिरिभ्रज इति गिरि - भ्रजः । न । ऊर्मयः । मदन्तः । बृहस्पतिम् ।

अभीति । अर्काः । अनावन्न् ॥ हꣳसैः । इव । सखिभिरिति

सखि - भिः । वावदद्भिरिति वावदत् - भिः ।

अश्मन्मयानीत्यश्मन् - मयानि । नहना । व्यस्यन्निति वि-अस्यन्न् ॥

बृहस्पतिः । अभिकनिक्रददित्यभि – कनिक्रदत् । गाः । उत । प्रेति ।

अस्तौत् । उदिति । च । विद्वान् । अगायत् ॥ एति । इन्द्र ।

सानसिम् । रयिम् । **43 (50)**

**<u>TS 3.4.11.4</u>**

सजित्वान॑ सदासहं ।

वर्.षिष्ठमूतये भर ॥

प्र ससाहिषे पुरुहूत शत्रून् ज्येष्ठस्ते शुष्म इह रातिरस्तु ।

इन्द्राऽऽ भर दक्षिणेना वसूनि पतिः सिन्धूनामसि रेवतीनां ॥

त्व॑ सुतस्य पीतये सद्यो वृद्धो अजायथाः ।

इन्द्र ज्यैष्ठ्याय सुक्रतो ॥

भुव–स्त्व–मिन्द्र ब्रह्मणा महान् भुवो विश्वेषु सवनेषु यज्ञियः ।

भुवोनॄ॑श्च्यौत्नो विश्वस्मिन् भरे ज्येष्ठश्च मन्त्रो – [ ] **44**

## <u>TS 3.4.11.4 - Padam</u>

सजित्वानमिति स – जित्वानम् । सदासहमिति सदा – सहम् ॥

वर्.षिष्ठम् । ऊतये । भर ॥ प्रेति । ससाहिषे । पुरुहूतेति पुरु–हूत ।

शत्रून् । ज्येष्ठः । ते । शुष्मः । इह । रातिः । अस्तु ॥ इन्द्र । एति । भर । दक्षिणेन । वसूनि । पतिः । सिन्धूनाम् । असि । रेवतीनाम् ॥ त्वम् । सुतस्य । पीतये । सद्यः । वृद्धः । अजायथाः । इन्द्र । ज्यैष्ठ्याय । सुक्रतो इति सु–क्रतो ॥ भुवः । त्वम् । इन्द्र । ब्रह्मणा । महान् । भुवः । विश्वेषु । सवनेषु । यज्ञियः ॥ भुवः । नॄन् । च्यौत्नः । विश्वस्मिन्न् । भरे । ज्येष्ठः । च । मन्त्रः । **44 (50)**

**TS 3.4.11.5**

विश्वचर्.षणे ॥

मित्रस्य चर्.षणीधृतः श्रवो देवस्य सानसिं ।

सत्यं चित्रश्रवस्तमं ॥

मित्रो जनान् यातयति प्रजानन् मित्रो दाधार पृथिवीमुत द्यां ।

मित्रः कृष्टीरनिमिषाऽभि चष्टे सत्याय हव्यं घृतवद्–विधेम ॥

प्र स मित्र मर्तो अस्तु प्रयस्वान्. यस्त आदित्य शिक्षति व्रतेन ।

न हन्यते न जीयते त्वोतो नैनम॒ꣳहो अश्ञोत्यन्तितो न दूरात् ॥

य– [ ] **45**

**TS 3.4.11.5 - Padam**

विश्वचर्.षण इति विश्व – चर्.षणे ॥ मित्रस्य । चर्.षणीधृत इति चर्.षणी – धृतः । श्रवः । देवस्य । सानसिम् ॥ सत्यम् । चित्रश्रवस्तममिति चित्रश्रवः – तमम् ॥ मित्रः । जनान् । यातयति । प्रजानन्निति प्र – जानन् । मित्रः । दाधार । पृथिवीम् । उत । द्याम् ॥ मित्रः । कृष्टीः । अनिमिषेत्यनि – मिषा । अभीति । चष्टे । सत्याय । हव्यम् । घृतवदिति घृत–वत् । विधेम ॥ प्रेति । सः । मित्र । मर्तः । अस्तु । प्रयस्वान् । यः । ते । आदित्य । शिक्षति । व्रतेन ॥ न । हन्यते । न । जीयते । त्वोतः । न । एनम् । अꣳहः । अश्ञोति । अन्तितः । न । दूरात् ॥ यत् । **45 (50)**

**TS 3.4.11.6**

च्चिद्धि ते विशो यथा प्र देव वरुण व्रतं ।

मिनीमसि द्यविद्यवि ॥

यत् किञ्चेदं वँरुण दैव्ये जनेऽभिद्रोहं मनुष्याश्चरामसि ।

अचित्तीयत् तव धर्मा युयोपिममा नस्तस्मादेनसो देव रीरिषः ॥

कितवासो यद् रिरिपुर्न दीवि यद् वा घा सत्यमुतयन्न विद्म ।
सर्वा ता विष्य शिथिरे–( )–व देवाऽथा ते स्याम
वरुण प्रियासः ॥ 46

**TS 3.4.11.6 - Padam**

चित् । हि । ते । विशः । यथा । प्रेति । देव । वरुण । व्रतम् ॥
मिनीमसि । द्यविद्यवीति द्यवि – द्यवि ॥ यत् । किम् । च । इदम् ।
वरुण । दैव्ये । जने । अभिद्रोहमित्यभि – द्रोहम् । मनुष्याः ।
चरामसि ॥ अचित्ती । यत् । तव । धर्मा । युयोपिम । मा । नः ।
तस्मात् । एनसः । देव । रीरिषः ॥ कितवासः । यत् । रिरिपुः । न ।
दीवि । यत् । वा । घ । सत्यम् । उत । यत् । न । विद्म ॥ सर्वा ।
ता । वीति । स्य । शिथिरा ( ) । इव । देव । अथ । ते । स्याम ।
वरुण । प्रियासः ॥ 46 (57)

*(सोमो–गोषु मा– रयिं –मन्त्रो–य–च्छिथिरा–सप्त च ) (A11)*

================

**Prasna Korvai with starting Padams of 1 to 11 Anuvaakams :-**

(वि वा ए॒तस्या – वायो – इ॒मे वै – चि॒त्तञ्चा॒ – ऽग्निर्भू॒ताना॑ं – दे॒वा वा अभ्याता॒ना – नृ॒ता॒षाड् – रा॒ष्ट्रकामा॒य – देवि॒का – वास्तोष्प॒ते – त्वमग्ने बृ॒ह – देकादश )

**Korvai with starting Padams of 1, 11, 21 Series of Panchaatis :-**

(वि वा ए॒तस्ये – त्याह – मृ॒त्युर्गन्ध॒र्वो – ऽव रुन्धे मद्ध्य॒त – स्त्वमग्ने बृ॒हथ् – षट्चत्वारिꣳशत्)

**First and Last Padam of Fourth Prasnam of Kandam 3 :-**

(वि वा ए॒तस्य – प्रि॒यासः )

॥ हरिः ओं ॥

॥ कृष्ण यजुर्वेदीय तैत्तिरीय संहितायां पद पाठे

तृतीयकाण्डे चतुर्थः प्रश्नः समाप्तः ॥

**Details of Panchati and Padam for Kandam 3 , Prasanam 4 – (TS 3.4)**

| | Panchati | Padams |
|---|---|---|
| Anuvakam 1 | 4 | 221 |
| Anuvakam 2 | 2 | 113 |
| Anuvakam 3 | 8 | 392 |
| Anuvakam 4 | 1 | 75 |
| Anuvakam 5 | 1 | 67 |
| Anuvakam 6 | 2 | 118 |
| Anuvakam 7 | 3 | 146 |
| Anuvakam 8 | 7 | 349 |
| Anuvakam 9 | 7 | 359 |
| Anuvakam 10 | 5 | 245 |
| Anuvakam 11 | 6 | 307 |
| Total → | 46 | 2392 |

**Notes:**

- **Please refer to the book "TS Kandam 1" and "TS 1.1 pada paadam with Vaakyam" for notes and conventions used in this Compilation.**
- **Please download our vedic compilations from our web site www.vedavms.in**